## मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य। (६/२३९४)

'मान पूजायाम्' (धा. पा. ९७३), 'बध बन्धने' (धा.पा. ९७४), 'दान अवखण्डने' (धा. पा. ९९५), 'शान [1]अवतेजने' (धा. पा. ९९६), इत्येतेभ्यो धातुभ्यः सन् प्रत्ययो भवति, अभ्यासस्य च इकारस्य [2]दीर्घादेशो भवति। मीमांसते। बीभत्सते। [3]दीदांसते। [4]शीशांसते। उत्तरसूत्रे वाग्रहणं [5]सर्वस्य शेषो विज्ञायते, तेन क्वचिन्न [6]भवत्यपि। [7]मानयति। बाधयति। दानयति। [8]निशानयति।

[१७९] अत्रापि सन्नर्थविशेष इष्यते।

मानेर्जिज्ञासायाम्, बधेर्वैरूप्ये, दानेरार्जवे, शानेर्निशाने[9] ॥

## धातोः कर्मणः समानकर्तृकादिच्छायां वा। (७/२६०८)

इषिकर्म यो धातुरिषिणैव समानकर्तृकः, तस्मादिच्छायामर्थे वा सन् प्रत्ययो भवति। कर्मत्वं समानकर्तृकत्वं च धातोरर्थद्वारकम्[10]। कर्तुमिच्छति चिकीर्षति। [11]जिहीर्षति। [12]धातुग्रहणं किम्? सोपसर्गादुत्पत्तिर्मा भूत्। प्रकर्तुमैच्छत् प्राचिकीर्षत्। कर्मणः इति किम्? करणान् मा भूत्। गमनेनेच्छति। समानकर्तृकात् इति किम्? देवदत्तस्य भोजनमिच्छति यज्ञदत्तः। इच्छायाम् इति किम्? कर्तुं जानाति। वावचनाद् वाक्यमपि भवति। धातोः इति विधानादत्र सनः आर्धधातुकसञ्ज्ञा [13]भवति, न पूर्वत्र।

[१८०] आशङ्कायामुपसंख्यानम्। (म.भा. २.१४)

आशङ्के पतिष्यति कूलम्, पिपतिषति कूलम्। [14]श्वा मुमूर्षति।

[१८१] इच्छासन्नन्तात् प्रतिषेधो वक्तव्यः। (म.भा. २.१५)

चिकीर्षितुमिच्छति। [15]विशेषणं किम्? [16]जुगुप्सिषते। मीमांसिषते।

शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः।
[17]सरूपः प्रत्ययो नेष्टः सनन्तान्न सनिष्यते ॥ (म. भा. २.१५)

## सुप आत्मनः क्यच्। (८/२६५७)

कर्मणः इच्छायां वा [18]इत्यनुवर्तते। इषिकर्मणः एषितुः[19]एवात्मसम्बन्धिनः सुबन्ताद् इच्छायामर्थे वा क्यच् प्रत्ययो भवति। आत्मनः पुत्रमिच्छति पुत्रीयति[20]। सुब्ग्रहणं किम्? वाक्यान् मा भूत्। महान्तं पुत्रमिच्छति (म. भा. २. १७)। आत्मनः इति किम्? राज्ञः पुत्रमिच्छति[21]। ककारः 'नः क्ये' (१. ४. १५/२६५९) इति सामान्यग्रहणार्थः। चकारस्तदविघातार्थः।

---

1. अव नास्ति फ. 2. दीर्घो फ. 3. दीदांसति ड. 4. शीशांसति ड. 5. सर्वशेषो अ. क्र. फ. 6. भवत्येव फ, भवति क. 7. अतिमानयति क अभिमानयति ड. 8. नि नास्ति फ. 9. निशानमवदानम् इत्यधिकम् क, अवदानं निशानम्। चुरादावस्य पाठात् णिच्, तस्मात् पचाद्यच् इत्यधिकम् ड. 10. वेद्यम् इत्यधिकम् फ, विशेषणम् इत्यधिकम् क. ड, वाचकं वेदितव्यम् इत्यधिकम् ग. 11. हर्तुमिच्छति इत्यधिकम् क. 12. धातोरिति क.ग.फ. 13. भवति नास्ति क. 14. उदाहरणमिदं नास्ति क. 15. इच्छा इत्यधिकम् ग. 16. जुगुप्सिषति ग. 17. सरूपप्रत्ययः क. ड. 18. इति नास्ति क. फ. 19. एव नास्ति फ. 20. वरीयति इत्यधिकम् फ, पटीयति इत्यधिकम् क. ड. 21. अमात्यः इत्यधिकम् क.